International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 165-169
© 2020 IJSR
www.anantaajournal.com
Received: 20-01-2020
Accepted: 22-02-2020

**डा. महाबल राव् एम्.जि.**
सहायक प्राध्यापकः संस्कृतविभागः
एस्, एस, एस्, ऐ, एच्. एल्
मुद्देनहल्लिपरिसरः
चिक्कबल्लापुरम्-कर्नाटक, भारत ।

**Corresponding Author:**
**डा. महाबल राव् एम्.जि.**
सहायक प्राध्यापकः संस्कृतविभागः
एस्, एस, एस्, ऐ, एच्. एल्
मुद्देनहल्लिपरिसरः
चिक्कबल्लापुरम्-कर्नाटक, भारत ।

# वेदस्मृतिषु भू-जलनिर्वहणविचाराः तस्य प्रस्तुतोपयोगंच

**डा. महाबल राव् एम्.जि.**

विश्वस्य साहित्यजगति संस्कृतसाहित्यस्य स्थानंहिमालयवत् महोन्नतं वर्तते। जगतः सर्वप्रथम साहित्यं भवतिवेदाः। अत्र ये विचारः सन्ति ते सार्वकालिकाः सार्वत्रिकाः च। लौकिकालौकिक विषयाः सम्यगत्रविवृताः सन्ति। प्रायः जनसामान्यमानसे वेदाः, उपनिषदः, पुराणानि इत्युक्ते मन्त्रभूयिष्ठाः देवस्तुतिपरकाः, यज्ञयागादिविचाराः इत्येव मन्यन्ते। तत्र कारणं तु भवति संस्कृतज्ञानस्य अभावः, संस्कृतस्योपरि दिव्यनिर्लक्ष्यं च। अन्यच्च वयं भारतीयाः अस्माकं संस्कृतेः, अचारविचाराणां विषये अवधानपूर्वक मात्सर्य भावंप्रकटयन्तः स्म। सर्वे आधुनिको भवितुं पाश्चात्यसंस्कृतेः अवलम्बनं कुर्वन्ति। अस्माकं संस्कृतेः अवगणनं च कुर्वन्ति। ये तत्र वेदादिषु कृतभूरिपरिश्रमाः ते वैज्ञानिकदृष्ट्या अध्ययनं बहुविरलतया विधीयन्ते। साम्प्रतिके जगति मानवस्य अत्याशया-दुराशया च सर्वत्र सर्वविधप्रदूषणं जायमानमस्ति। अनेन मनुष्यस्य स्वार्थमनोभावेन परिसरस्य प्रदूषणं बहुविपरीततया भवत् अस्ति। सम्प्रति जायमानेषु प्रदूषणेषु तत्सम्बद्ध परिहारोपायान् च अस्माकं सनातनग्रन्थेषु किमुक्तमिति अत्र आलोच्यते। विशेषतया जलंमानवस्य अमृतमस्ति। तस्य अमृतस्य प्रदूषणम् अनेकरीत्या क्रियमाणमस्ति मानवैः | तत्सर्वं सम्प्रति यथामतिं विचार्यते।

'पर्यावरणम्' इति संस्कृतेन व्यवह्रियमाणा वातवरणस्य सर्वाङ्गानां नाम पृथ्व्यप्तेजोवाय्वाकाशस्य अध्ययनं आवेदकालत् अस्माकं ऋषि-मुनयः चक्रुः, इत्यत्र वृक्षायुर्वेदादि ग्रन्थाः एव मौलिकाः सन्ति। पुरातनकाले पर्यावरणात् मानवस्य अभेदः आसीत्। तदिदानीं अभिवृद्धिः, नगरीकरणं, नूतनता इत्यादि विभिन्नेषु नामसु मानवः परिसरात् बहुदूरं तिष्ठति |

तदानीन्तनकाले पर्यावरणस्य कालुष्यं अद्यतनवत् न सम्भवतिस्म। यतोऽहि एकं तु परिसस्योपरि विद्यमाना दैवत्वभावना, तथा यदि पर्यावरणस्य कालुष्येन प्रकृतिदेवताः शापं दद्युः इति भयकारणमपि तत्र आसीत्। ते, अस्माकं पूर्वजाः प्रकृतिं मानवात् भिन्नत्वेन न दृष्टवन्तः। सर्वे वनवासीनः अपि एक श्रुत्या जीवनस्य भागग्रहीतृरूपेण अपश्यन्। अतः तत्र असमानातायाः आस्पदः एव न आसीत्। साधवः, मुनयः, ऋषयः इत्यादयः अत्र प्रमाणभूताः सन्ति। अतः ऐन्स्टीनमहोदयः वदति 'Nature is like a vibrating Veena' इति। ते वेदकालीनजनाः मेघानां, नदीः, वायोः विषयेऽपि जागृताः आसन्। एतेषां पर्यावरणस्य निर्वहणविषये वेदाः, पुराणानि, उपनिषद्, अर्थशास्त्रं, स्मृतयः, रामायण तथा महाभारतादिषु च बहवः उल्लेखाः च लभ्यन्ते। अतः सर्व प्रथमं सर्वेषु ग्रन्थेषु भूमिं माता इति व्याहृतम् अस्ति। पर्यावरणस्य तत्रापि अरण्यस्य ततः प्राप्यमाणस्य उत्पन्नस्य रक्षणं तेषाम् आद्यं कर्तव्यवत् स्वीकृतवन्तः। मृगाः, वृक्षाः, जलं, वायुः तथा भूमिः देवशक्तेः अंशाः इति परिगणितवन्तः। ऋग्वेदानुसारं अयं विश्वः पञ्चभूतात्मकः अस्ति। तस्मिन् काले यज्ञः सर्वमान्यः सर्वसामान्यः च आसीत्। अतः यज्ञानां कालः स च इति वक्तुं शक्यते | यज्ञस्य उद्देशः यद्यपि स्वर्गकामादि इष्टप्राप्तिः भवेदपि, तस्य अपरः हेतु च भवति वातवरणस्य शुद्धीकरणम्। अस्माकं पूर्वजैः ज्ञातमासीत् यत् सम्यग्रूपेणहुतः यज्ञहविषा वातावरणस्य कालुष्यं न्यूनीभूत्वा विशेषातः वायोः तथा वृक्षाणां निर्मलीकरणं भवति इति। अथर्ववेदानुसारं [1] शुद्धजलं अत्यन्त परिणामकारी औषधिः अस्ति येन सर्वरोगाः निदानमेति इति। तत्रैव उक्तं यत् पृथ्वी मातृरूपेण गौरवनीया रक्षणीया च इति। अतः सर्वेषाम् एतेषां ग्रान्थानाम् अवलोकनेन ज्ञायते यत् परिसर रक्षणे पुनर्नवीकरण वस्तूनां विषये तथा नैसर्गिकसम्पत्तीनां विषये तथा तेषां रक्षणं भविष्यति तस्य प्रयोजनदानं च तेषां परमकर्तव्यमासीत् इति ज्ञायते।

मनुसृतौ [2] पर्यावरणविज्ञानस्य मौल्ये उक्तं यत् भारतीय ऋषिमुनयः अद्यतन मानवापेक्षया ते पर्यावरणरक्षणविषये तस्य वर्धनविषये च बहु आस्थां दर्शयन्ति स्म इति। ते पर्यावरणस्य प्रदूषणस्य अवरोधनार्थं काञ्चन नियमान् अपि रचितवन्तः। उपनिषद्, आरण्यकाः, स्मृतयः एतेषाम् अवलोकनेन ज्ञायते यत् पुराणभारते अरण्यसंरक्षणं, दिव्यवृक्षाः, दिव्याभूमिः इत्यादि विषये सम्यक् रूपेण निर्वहणा क्रमः तैः प्रतिपाल्यते स्म इति।

**भूसम्पन्मूल निर्वहणम् -**

मानवनागरिकतायाः अस्तित्वम् उत्तम, आरोग्यकर पर्यावरणेन सह आश्रितमस्ति। वासयोग्यभूमिः, पानयोग्य जलम्, उतमः वायुः, वृक्षादयः, च मानवस्य कनिष्ठतम उत्तमवातवरणस्य मूलभूतापेक्षा अस्ति। भूमिः अत्यन्त महत्वपूर्णा पर्यावरणस्य आधारभूतः अंशःअस्ति। यतोऽहि भूमौ एव जलं, सस्य, प्राण्यादयः स्थातुं शक्नुवन्ति। अतः प्रकृतिः भूदेवी, भूमाता इत्युपासते अस्माभिः। तदोक्तं अथर्ववेदे- "माता भूमिः पुत्रोऽहं पृथिव्याः[3]

**तत्रैव-**

गिरयस्ते पर्वता हिमवन्तोरण्यं ते पृथिविस्योनमस्तु|
बधं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीन्द्रगुप्ताम् |
अजातोहतो अक्षतो ध्यष्ठां पृथिवीमहम्।[4]

हे! भूमातः नगेन प्रियः, हिमाच्छादित शिखराणि, वनानिच। हे वर्णमयि! रक्ष भूमिं अहमत्र स्थितवान्, विनापजयेन विनाव्रणेन च। इति अस्य मन्त्रस्यार्थः। भूमाता अतीव मनोहरेण वेदादिषु, अन्यसंस्कृतसाहित्येषु वर्णिता अस्ति। तत्र उदाहरणम् अत्र -

[1]अथर्ववेदःसू-5

[2]Environmental Laws of Manu by Pady S Dash publ on (1-12) 2006

[3]अथर्ववेदः 12-1-12

[4]अथर्ववेदः 12-1-11

असंबाधं बध्यतो मानवनां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥[5]

नमोऽस्तु भूमातः! या मानवेभ्यः अनिर्बन्धित उदारतां तस्याः गिरिः, शिखराणि, प्रस्थान भूद्वारा प्रदता, सा नैकाः रोगनिर्मूलन ओषधीः तस्यां युक्ता वर्तते। मानावानाम् अभ्युदये, स्वास्थ्याय च सा ताः स्रोतांसि विदध्यात।
भूमाता धार्मिकतायाः तथा जीवनस्य रक्षां करोति इति अस्माकं विश्वासः। ऋषयः अपि भूमातुः क्षमा याचन्ते तस्याः उपरि पादाघातं कुर्वन्ति गमनागमनं कुर्वन्ति इति हेतोः तद्यथा -

समुद्रवसने देवि पर्वतस्तन मण्डिते ।
विष्णुपत्नी नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

पुरुषसूक्तोऽपि अस्य मूलभूत प्रपञ्चस्य अवयवाः सन्ति मानवाः, देवाः, प्रकृतिः इति। वैदिककालीन जनाः तदनन्तरकालीनाः च पर्यावरणरक्षणविषये सर्वदा प्रयत्नशीलाः जागरूकाः च आसन्। ते अचिन्तयन् यत् कृषि निमित्तं भूमेः कर्षणम्, भवन-गृहादि निर्माणम् अपि भूमातुः पवित्रतायाः नाशः इति। अतः प्राक्तनाः अद्यतनाः अपि नराः यत्किमपि खनन-सम्बद्धकार्यारम्भात् प्राक् भू प्रार्थानां कुर्वन्ति। तदुक्तम् अथर्ववेदे भूमौ सस्यानां विवर्धयितुं प्रार्थना अस्ति इयं-
यत् ते भूमे विखनामि क्षिप्रंतदपि रोहतु' [6] -इति। तदुक्तं मनुस्मृतौ यदि फलवत्तता भूमिः कृषिकर्म निमित्ती कृत्य खननं क्रियते चेदपि कानीचन नियमाः पालनीयाः इति-
तद्यता-

न फालकृष्टे न जले न चित्यां न च पर्वते ।
न जीर्णदेवायतने न वल्मीके कदाचन' ॥[7] इति
न स सत्वेषु गर्तेषु न गच्छनपि न स्थितः।
न नदी तीरमासाद्य न च पर्वतमस्तके ॥[8]

न कश्चित् जनान्तिके, जलस्रोतसः तटे, पर्वतायने, जलागारे, इष्टिका समतले, जीर्णीभूत देवालये वल्म्मीके पर्वतशिखरे कर्षणं खननं च कुर्यात् इति। एतेषां दूषणे अपि स्मृतिः वदति एवं-

वायु-अग्नि-विप्रम्-आपः पष्यंस् तथा एव गाः ।
न कदाचन कुर्वीत विषमूत्रस्य विसर्जनम् ॥[9] इति

अनेन ज्ञायते यत् वेदकालादि जनाः प्रकृतेः रक्षणे अथवा मालिन्यादि निर्वहणे तादृशाः निष्ठुरवादिनः आसन् यतः तेषां सम्यग्ज्ञानमासीत् यत् प्रकृतिं विना मानवस्य जीवनं बहु दुस्तरं तथा तस्याः मलिनेन अपि अस्माकं जीवनं, स्वास्थ्यं च बहु कष्टकरं भवन्ति इति।

**जलसंसाधनस्य निर्वहणम्**

मर्त्यलोके मानावस्य अमृतम् इत्युक्ते जलम्। अहारेण विना जीवितुं शक्यते परं जलं विना जीवनम् अत्यन्तं कष्टकरम् भवति । ऋग्वेदे जलम् अमृतत्वेन वर्णितं वर्तते । आवेदकालादारभ्य जलं देवता रूपेण उपास्यमाना दरीदृश्यते सर्वत्र । तद् यथा ऋग्वेदे-

**यस्य द्यावापृथिवी पौंस्य महद्यस्य व्रते वरुणो यस्य सूर्यः।**[10]

आकाशात् माता भूमिः जलं स्वीकरोति, पिता सर्वान् विद्यमानान् जन्तून् पितृवत् पालयति इति । आपः - अप् धातोः निष्पन्नः शब्दः चतुर्षु सूक्तेषु विवर्णितः वर्तते । तद्धिदेवता रूपेण इन्द्रः, वरुणः, पर्जन्यः इत्युपासना अपि भवति । तद् ऋग्वेदे-

---

5 भूसूक्तम्
6 अथर्ववेदः
7 मनुस्मृतिः 4-47
8 मनुस्मृतिः 4-46
9 मनुस्मृतिः 4-48
10 ऋग्वेदः 7. 101.3

समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः|
इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ||[11]

हे नर! जलं यत् आकाशादागच्छति वृष्टिरूपेण तत् सर्वथा सम्यगुपयोक्तव्यम् इति। दिव्यजलं पञ्चांश भूताः भवति- शीतम्, शिवम्, शुचिः, इष्टम्, विमलं लहु षड्गुणम् इति। तद्यथा-

तीव्राः सोमास आगह्याशीर्वन्तः सुता इमे वायो तान्प्रस्थितन्पिब |
उभा देवा दिविस्पृशेन्द्रवायू हवामहे अस्य सोमस्य पीतये ||[12]

जलं देहस्य मलिनापहारी, स्वास्थ्यकरी, उत्तम दीर्घकालसूर्यदर्शनाय नाम बहुदीर्घजीवनयापनार्थं शुद्धं जलं परमावश्यकम् इति अस्यार्थः। यद् इदानीम् आधुनिकाः वदन्ति उत्तमजीवनाय योगः तथा शुद्धं जलं पेयमिति तद् तदा वेदकाले एव अस्माकं पूर्वजाः अवगतवन्तः आसन्। न केवलं जलस्य रक्षणं वा उपयोगं वा निरूपयति वेदः। कोऽपि जलस्य मालिन्यं करोति चेत् तस्मै दण्डरूपेण कश्चन नाणकानि अपि निश्चितः आसीत् तदानीन्तन काले एव। तद्कुत्र वा भवतु देवालयस्य, वा कूपस्य अथवा कृषिक्षेत्रस्य जलमूलं वा भवतु नकश्चित् मलिनं कुर्यात्। तद् तद् अनुसारेण दण्डस्य मौल्यमपि वर्धते स्म । यतोऽहि प्रायः सर्वेषु देवालयेषु कल्याणी नाम्ना बृहत् जलागरः भवति । तत्र सार्वजनिकाः जनाः आगच्छन्ति अतः तस्य जलमूलस्य मलिनं कदापि न भवेत् । जलस्य संरक्षणे, कूपखनने, कुल्याः निर्माणे, तेषां विशेषास्था आसीत् | Rain Harvesting इति यद् अद्यतने बहुमान्यत्वमाप्नोत् तस्य ज्ञानं तदैव तेषामासीत् । अतः वृष्टेः जलं यथा व्यर्थं न भवेत् तथा तैः जलनिर्वहणं कृतमासीत् । जलप्रदूषणस्य विषये मनुस्मृतौ एवमुक्तम्-

न अप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् |
अमेध्यलिप्तम् अन्यद् लोहितं वा विषाणिवा ||[13]
न अन्नम् अद्याद् एकवासा न नग्नः स्नानम् आचरेत् |
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ||[14]

इत्थं बहुविधतया जलस्य पर्यावरणस्य रक्षणं, पोषणं च विवृतं वेदस्मृत्यादिषु | जलं मानवजीवनस्य मूलधारः अस्य रक्षणम् अस्माकं परमं कर्तव्यं वर्तते। अद्यतने युगे मानवः ज्ञात्वा अपि जलस्य वृथा व्यर्थं, प्रदूषणं च कुर्वन् अस्ति। तद् न भवेत्।

**उपसंहारः**

पर्यावरणं प्रपञ्चस्य सर्वविधानां मूलाधारः अस्ति। शुद्धंजलं, शुद्धः वायुः, स्वच्छं वातवरणं सर्वेषां स्वस्थ जीवनाय आत्यन्तिकं आवश्यकमस्ति। अद्य विश्वे मानवस्य दुराशा, अत्याशा पर्यावरणस्य प्रदूषणे महत्कारणं भवति। यदि अस्माकं वेदादिसाहित्यम् अवलोकयामश्चेत् तत्र अस्माकं पूर्वजाः कथं प्रकृतिना सह व्यवहरन्ति स्म इति ज्ञायते | अनेनैव प्रकारेण यदि वयं प्रकृतेः उपासनं कृत्वा पूज्यभावेन रक्षामः चेत् भाविनिकाले विश्वे शुद्धपरिसरस्य प्रदानं भवति। नोचेत् वयमेव अस्माकं कुलक्षयस्य कारणिभूताः भविष्यामः।
अतः प्राक्तनसाहित्यं नूतनं तन्त्रज्ञानं च सम्यगुपयुज्य परिसरस्य रक्षणं वयं सर्वे कर्तुं शक्नुमः। तद् अस्माकम् आद्यं कर्तव्यमपि भवेत्। यदि वेदादि साहित्यमनुसरामः चेत् तत्र जलादि मानवस्य जीवनाधारस्य अमृतस्य उपयोगः, समीचीनतया निर्वहणं च ज्ञातुं शक्यते। वयं सर्वे तद् अध्ययनं कृत्वा आधुनिक तन्त्रज्ञानेन सह सम्मील्य

[11] ऋग्वेदः7. 49.1
[12] ऋग्वेदः 7. 23.2
[13] मनुस्मृतिः 4-56
[14] मनुस्मृतिः 4-45

परिसररक्षणे विशेषतः जलस्य रक्षणे नूतनाविष्कारं विधाय आनन्देन जीवामः इति मे आशयः।

||ओं स्वस्ति||

## परिशीलितग्रन्थसूची


1. ऋग्वेदः- गोविन्दचन्द्रपाण्डे, प्रकाशकः लोकभारतिअलहाबाद्- 2008.
2. अथर्ववेदः- Joshi KL. Chowkamba Sanskrit bhavan Varanasi, 1996.
3. The Rigveda Stephanie W Jamison and Joel, English, 2014.
4. Rigveda Samhitā, Wilson HH, Ravi Prakash Arya, Joshi KL. 4-volume set published by Parimal (ISBN 978-81-7110-138-2). Revised edition of Wilson's translation, 2001.
5. Science in Veda- by D. R. Khanna, 2009.
6. The Atharvaveda and the Vrātyas, The Roots of Hinduism: The Early Aryans and the Indus Civilization, Oxford University Press, Chapter 12,
7. The Ancillary Literature of the Atharva-Veda, BR Modak Rashtriya Veda Vidya Pratishthan, 1993.
8. Ecological Sustainability in India through the Ages Sharma R Agarwal, 2014.
9. Manusmruti–shivaraaj koundinyan Chowkamba Sanskrit bhavan Varanasi, 2014.
10. मनुस्मृतिः -रामेश्वरभट्टःचौकम्बासंस्कृतिप्रतिष्ठानम् वाराणसि. 2011.
11. मनुस्मृतिः - गङ्गानाथझाचौकम्बासंस्कृतिप्रतिष्ठानम् वाराणसि. 2001
12. Flora and Fauna in Samskrit literature SC Banarjee Naya prakaasha Calcutta, 1980.
13. Environmental Awareness in ancient India R RAO International journal of life science research, 2014.
14. Environmental Awareness at the Time of Vedas, Dr Nimisha Sharma. Veda-Vidyā, 2015.